# संस्कृतवार्ता:

दिनाङ्क :- 12.05.2025

प्रात: - 06:55

सैन्याभियानम्-सम्पूर्णवृतान्तम्

भारतीय-सेनाया: सैन्य-सञ्चालन-महानिदेशक: डी.जी.एम्.ओ. इत्येष: लेफ्टिनेंट-जनरल-राजीव-घई-इत्यसौ संसूचितवान् यत् सिन्दूराभियानावधौ पाकिस्ताने पाकिस्तानाधिकृतजम्मूकश्मीरे च नव आतङ्की-स्थानेषु जाते आक्रमणे शताधिका: आतङ्कवादिन: मारिता:। नवदिल्ल्यां वार्तासमूहं सम्बोधयन् डी.जी.एम्.ओ. इत्येष: अकथयत् यत् मृतेषु आतङ्कवादिषु युसूफ-अजहर: अब्दुल-मलिकरऊफ: मुदासिर-अहमद-सादृशा: आतङ्कवादिन: सम्मिलिता: सन्तीति। ये आई.सी. 814 इत्येतस्य अपहरणप्रकरणे पुलवामा-विस्फोटप्रसङ्गे च सम्मिलिता: आसन्। असौ अग्रे प्रतिपादितवान् यत् सिन्दूराभियानस्य समग्रावधारणा आतङ्कवादस्य अपराधिन: योजनाकर्तॄन् च दण्डयितुं तेषाञ्च आतङ्कीसंरचनां विनष्टीकर्तुं च सैन्योद्देश्येनसह समारब्धासीत्। पाकिस्तानदेशस्य कियत् विमानानि बिनष्टीजातानि इत्येतस्मिन् पृष्टे प्रश्ने वायवीय-सञ्चालन-महानिदेशक: एयरमार्शल ए.के. भारती प्रावोचत् यत् पाकिस्तानस्य विमानानि सीम्न: अन्त: प्रवेशात् पूर्वमेव अवरुद्धानि कानिचिच्च निश्चितरूपेण मारितानि। नौसेना-सञ्चालन-महानिदेशक: वाइस-एडमिनरल-ए.एन्. प्रमोद: न्यगादयत् यत् अस्माकं सैन्यबलम् उत्तरीयारबसागरे निर्णायकोद्धारमुद्रायाम् उपस्थितं वर्तते यस्मिन् सागरीयभूमिक्षेत्रयो: कराचीं समेत्य चितेषु लक्ष्येषु आक्रमणं कर्तुं पूर्णतया सज्जं क्षमतायुतञ्च विद्यते। असौ अवदत् यत् भारतीयनौसेना पाकिस्तानस्य कस्यापि शत्रुतापूर्वक-कार्याचरणस्य निर्णायकपद्धत्या प्रत्युत्तरं दातुं विश्वासयुते उद्धारकासाने सुस्थिरा विद्यते।

दिल्ली-विमानपत्तनम्

दिल्ली-विमानपत्तन-स्थानकम् सामान्यरूपेण सञ्चालितम्। एकस्मिन् प्रसारिते दिङ्निर्देशे डेल्ही-इण्टरनेशनल-एयरपोर्ट-लिमिटेड-इति ख्यापितवत् यत् यद्यपि नागरिकोड्डयनसुरक्षाविभागद्वारा निर्दिष्टस्य विमान-क्षेत्रस्य परिवर्तनमानासु परिस्थितिषु सुरक्षोपायेषु च वृद्धिं निध्याय काश्चित् विमानसेवा: प्रभाविता: भवितुं शक्नुवन्ति।

अथ च सुरक्षाप्रक्रिया लम्बिता भवितुं शक्नोति तथापि एतदुक्तं यत् यात्रिभि: स्व-सम्बद्ध-विमानस्य सञ्चार-वाहिन्य: माध्यमेन अद्यतनीयं भवितव्यम् तथा च दिङ्निर्देशा: अनुपालनीया: एतदतिरिच्य यात्रिण: केवलम् आधिकारिक-सूचनायां निर्भरा: भवेयुरिति अथ च भ्रामक-साम्रग्य: दूरे एव तिष्ठेयु:।

बुद्धपूर्णिमा

अद्य बुद्धपूर्णिमा आमान्यते। अस्मिन् दिवसे न केवलं गौतमबुद्धस्य जन्म अभूत् अपितु असौ बोधगयायां महाबोधि-वृक्षस्य अध: परिनिर्वाणप्राप्तमपि अकरोत्। राष्ट्रपतिपदासीना द्रौपदीमुर्मु: बद्धपूर्णिमावसरे देशवासिभ्य: समग्रे हि विश्वे भगवत: बुद्धस्य अनुयायिभ्यश्च शुभकामना: प्रदत्तवती। स्वसन्देशे राष्ट्रपति: अभिव्यक्तवती यत् करुणावतारेण भगवता बुद्धेन प्रदत्त: अहिंसाया: प्रेम्ण: दयालुतायाश्च सन्देश: सकलमानवजातिकल्याणस्य मूलाधारो विद्यते। उपराष्ट्रपति: जगदीपधनखड़: अपि बुद्धपूर्णिमाया: अवसरे देशवासिभ्य: शुभकामना: अयच्छत्। स्वसन्देशे उपराष्ट्रपति: प्रावोचत् यत् भगवत: बुद्धस्य सन्देश: समाह्वानयुते समये ध्रुवतारासदृशो वर्तते। अनेनोक्तं यत् भगवत: बुद्धस्य मध्यममार्गस्य सन्देश: अद्यत्वे विश्वे मानवतायै अधिक: उपयोगी अस्ति।

राष्ट्रियापात्प्रबन्धनाधिकरणम्

राष्ट्रियापात्प्रबन्धनप्राधिकरणेन एक: दिङ्निर्देश: प्रख्यापित: नागरिकै: यत्तै: कापि अज्ञातविस्फेटक-सामग्री नैव स्पृष्टव्या। एकस्मिन् सामाजिक-सन्देश-पटले एन्.डी.एम्.ए. इत्यनेनोक्तं यत् एषा विस्फोटकसामग्री सङ्कटयुता भवितुं शक्यते जनानां च गभीरव्रणस्य मृत्यो: च कारणमपि भवितुं शक्यते। तत्र इदमपि सूच्यते यत् यदि जना: कामपि अज्ञात-सामग्रीं प्राप्नुवन्ति तावत् स्थानीयाधिकारिभि: सम्पर्कं साधयेयु:।

।। इति वार्ता:।।